International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 161-166
© 2026 IJMH
www.themultijournal.com
Received: 28-05-2026
Accepted: 24-06-2026
Publish : 25-06-2026

**डॉ.भारती कौशल**
सहायकाचार्य,शिक्षापीठ,
श्री लाल बहादुर शास्त्री राष्ट्रीय-
संस्कृत विश्वविद्यालय, नई दिल्ली

**Correspondence:**
**डॉ.भारती कौशल**
सहायकाचार्य,शिक्षापीठ,
श्री लाल बहादुर शास्त्री राष्ट्रीय-
संस्कृत विश्वविद्यालय, नई दिल्ली

# शिक्षाया: परिप्रेक्ष्ये कृत्रिमबुद्धिमत्ताया: मानवीयप्रज्ञायाश्च दार्शनिकविवेचना: अवसरा:, नैतिकता: तथा चुनौत्य:

**डॉ.भारती कौशल**

**सार: (Abstract)**

एकविंशतितमशताब्द्याः तृतीयदशके मानवसभ्यतायाः इतिहासे महान् परिवर्तनकालः दृश्यते। अस्मिन् काले कृत्रिमबुद्धिमत्ता (Artificial Intelligence) केवलं यान्त्रिकनवोन्मेषः नास्ति, अपितु ज्ञानस्य, शिक्षायाः, अर्थव्यवस्थायाः, संस्कृतेः तथा च मानवीयनिर्णयप्रक्रियायाः सक्रियसहभागिनी अभवत्। शिक्षाक्षेत्रमपि अस्य परिवर्तनस्य प्रभावात् विमुक्तं नास्ति। अद्य कृत्रिमबुद्धिमत्ता वैयक्तिकाधिगमस्य, स्वचालितमूल्याङ्कनस्य, अनुसंधानसहायतायाः, आभासीयशिक्षणस्य तथा ज्ञानस्य शीघ्रप्राप्यतायाः माध्यमेन शिक्षायाः स्वरूपं पुनर्निर्धारयति। किन्तु अनेन सह एकः गम्भीरः दार्शनिकः प्रश्नः अपि उदेति—किं कृत्रिमबुद्धिमत्ता शिक्षायाः परमलक्ष्यं साधयितुं शक्नोति,अथवा सा केवलं ज्ञानसाधनमात्रम्? किं सूचनाविस्तारः एव शिक्षा,अथवा शिक्षायाः वास्तविकं प्रयोजनं मानवीयप्रज्ञायाः, विवेकस्य, आत्मबोधस्य च विकासः? प्रस्तुतस्य शोधालेखस्य उद्देश्यं कृत्रिमबुद्धिमत्तायाः मानवीयप्रज्ञायाश्च सम्बन्धस्य शिक्षादर्शनस्य दृष्ट्या विश्लेषणम् अस्ति। अस्मिन् भारतीयशिक्षादर्शनस्य, समकालीनशिक्षा-सिद्धान्तानाम्, कृत्रिमबुद्धिमत्तासम्बद्धसाहित्यस्य तथा नैतिकविमर्शानां समालोचनात्मकमध्ययनं कृतम्। अध्ययनस्य मुख्यप्रतिपादनम् अस्ति यत् कृत्रिमबुद्धिमत्ता ज्ञानस्य संगठनम्, विश्लेषणं प्रसारं च कर्तुं समर्था अस्ति, किन्तु सा मानवीयप्रज्ञायाः, नैतिकविवेकस्य, आत्मबोधस्य, करुणायाः तथा उत्तरदायित्वस्य विकल्पः न भवितुमर्हति। भविष्यस्य शिक्षायाः लक्ष्यं कृत्रिमबुद्धिमत्तेः मानवीयचेतनायाश्च मध्ये प्रतिस्पर्धां निर्मातुं न, अपितु उभयोः मध्ये सन्तुलितं दार्शनिकविवेचनम् विकसितुं भवेत्। एष एव विवेचना भविष्यस्य शिक्षां अधिकां मानवीयां, नैतिकां, सृजनशीलां च करिष्यति।

**प्रमुखशब्दाः—** कृत्रिमबुद्धिमत्ता, मानवीयप्रज्ञा, शिक्षादर्शनम्, नैतिकता, डिजिटलशिक्षा।

## १.भूमिका (Introduction)

मानवइतिहासे प्रत्येकः महान् यान्त्रिकपरिवर्तनः शिक्षायाः स्वरूपम् प्रभावितवान्। मुद्रणकलया ज्ञानस्य व्यापकप्रसारः अभवत्, औद्योगिकक्रान्त्या व्यावसायिकशिक्षायाः विकासः जातः, अन्तर्जालस्य (Internet) माध्यमेन वैश्विकज्ञानविनिमयः सम्भवः अभवत्, अधुना तु कृत्रिमबुद्धिमत्ता शिक्षायाः नूतनयुगस्य प्रारम्भं करोति। एषः परिवर्तनः केवलं यान्त्रिकः न, अपितु बौद्धिकः, सामाजिकः, दार्शनिकश्च अस्ति। वर्तमानकाले कृत्रिमबुद्धिमत्त्याधारितव्यवस्थाः विद्यार्थिभ्यः वैयक्तिकशिक्षणानुभवं प्रददति, जटिलानुसंधानकार्येषु साहाय्यं कुर्वन्ति, शिक्षकानां प्रशासनिककार्याणि सरलानि कुर्वन्ति च। अनेकेषु विश्वविद्यालयेषु एतादृशानि शिक्षणमञ्चानि शिक्षागुणवत्तावर्धनस्य साधनत्वेन स्वीकृतानि सन्ति। तथापि अस्य विकासस्य सह एकः महत्त्वपूर्णः प्रश्नः अपि उदेति—किं शिक्षा केवलं सूचनासञ्चारः? यदि कृत्रिमबुद्धिमत्ता ज्ञानं प्रदातुं शक्नोति, तर्हि शिक्षकस्य भूमिका का? यदि यन्त्राणि उत्तराणि दातुं समर्थानि, किं तानि विद्यार्थिषु विवेकं, संवेदनशीलतां, नैतिकोत्तरदायित्वं च विकसितुं

शक्नुवन्ति? अत्रैव शिक्षादर्शनस्य क्षेत्रम् आरभ्यते। भारतीयशिक्षा-दर्शनम् पूर्वे एव प्रतिपादयति यत् शिक्षायाः प्रयोजनं केवलं बाह्यज्ञानप्राप्तिः न, अपितु व्यक्तेः अन्तर्निहितचेतनायाः, विवेकस्य, आत्मबोधस्य च विकासः अस्ति। उपनिषदः ज्ञानं मोक्षस्य साधनं मन्यन्ते। भगवान् बुद्धः शिक्षां आत्मजागरणस्य मार्गम् अवदत्। स्वामी विवेकानन्दः शिक्षां मनुष्ये निहितायाः पूर्णतायाः अभिव्यक्तिम् अमन्यत। महात्मा गान्धी तां शरीरस्य, मनसः, आत्मनश्च समन्वितविकासस्य प्रक्रिया इति प्रतिपादितवान्। एतेषां सर्वेषां चिन्तनानां केन्द्रबिन्दुः मानवः, न तु यन्त्रम्। अद्य यदा कृत्रिमबुद्धिमत्ता मानवीयबौद्धिकक्षमतानां अनुकरणं करोति, तदा शिक्षायाः मूलप्रश्नः अधिकगम्भीरः भवति। यदि ज्ञानं यन्त्रेषु सञ्चितं भवितुं शक्नोति, तर्हि मनुष्यस्य वैशिष्ट्यं किम्? यदि सूचना कृत्रिमबुद्धिमत्त्या उत्पाद्यते, तर्हि शिक्षायाः परमलक्ष्यं किम्? आधुनिकदार्शिकनाम् मते भविष्यस्य शिक्षायाः वास्तविकः सङ्कटः यन्त्रज्ञानस्य अभावः न, अपितु प्रज्ञायाः अभावः अस्ति। यदि सूचना तथा ज्ञानं प्रज्ञया नैतिकविवेकेन च सह सम्बद्धं न भवेत्, तर्हि शिक्षा केवलं दक्षतां जनयिष्यति, उत्तरदायिनं मनुष्यं तु निर्मातुं न शक्नोति।

अतः अयं शोधालेखः कृत्रिमबुद्धिमत्तां शिक्षायाः विरोधिनीं न मन्यते, अपितु प्रतिपादयति यत् भविष्यस्य शिक्षा कृत्रिमबुद्धिमत्तायाः मानवीयप्रज्ञायाश्च मध्ये सन्तुलितेन नैतिकेन च विवेचनेन एव सफलतां प्राप्स्यति।

## २.अध्ययनस्य आवश्यकता तथा औचित्यम्

वर्तमानकाले विश्वस्य शिक्षाव्यवस्थाः कृत्रिमबुद्धिमत्तायाः उपयोगं शीघ्रतया स्वीकुर्वन्ति। वैयक्तिकाधिगमः, स्वचालितमूल्याङ्कनम्, डिजिटलशैक्षिकसामग्रीनिर्माणम्, शोधलेखनम् तथा निर्णयसहाय-तायां कृत्रिमबुद्धिमत्तायाः उपयोगः निरन्तरं वर्धते। तथापि अधिकांशचर्चाः यान्त्रिकदक्षतायामेव सीमिताः सन्ति; अस्य दार्शनिकाः, नैतिकाः, मानवीयाश्च आयामाः अपेक्षया न्यूनं विविच्यन्ते। यदि शिक्षायाः उद्देश्यं केवलं दक्षतानिर्माणं स्यात्, तर्हि कृत्रिमबुद्धिमत्ता पर्याप्ता भवेत्। किन्तु शिक्षा चरित्रनिर्माणस्य, नैतिकचेतनायाः, लोकतान्त्रिकमूल्यानां, सामाजिकोत्तरदायित्वस्य तथा आत्मबोधस्य विकासस्य अपि साधनम् अस्ति। अतः कृत्रिमबुद्धिमत्तायाः अध्ययनं केवलं यान्त्रिकदृष्ट्या न, अपितु शिक्षादर्शनस्य परिप्रेक्ष्ये अपि करणीयम्।

अयं अध्ययन एतस्याः आवश्यकतायाः आलोकः विश्लेषयति यत् कृत्रिमबुद्धिमत्ता शिक्षायाः केषु क्षेत्रेषु उपयोगिनी अस्ति, तस्याः दार्शनिकसीमाः काः सन्ति, मानवीयप्रज्ञया सह तस्याः समुचितः समन्वयः कथं साधनीयः इति।

## ३. अध्ययनस्य उद्देश्याः

अस्य अध्ययनस्य प्रमुखाः उद्देश्याः—

- कृत्रिमबुद्धिमत्तायाः मानवीयप्रज्ञायाश्च दार्शनिकस्वरूपस्य विश्लेषणम्।
- शिक्षाक्षेत्रे कृत्रिमबुद्धिमत्तायाः अवसराणां सीमाः च अध्ययनम्।
- कृत्रिमबुद्धिमत्त्याधारितशिक्षायाः नैतिकप्रश्नानां विवेचनम्।
- भारतीयशिक्षादर्शनस्य आलोकः मानवीयप्रज्ञायाः महत्त्वस्य स्पष्टीकरणम्।
- भविष्यस्य शिक्षायै कृत्रिमबुद्धिमत्तायाः मानवीयचेतनायाश्च सन्तुलितप्रतिमानस्य प्रतिपादनम्।

## ४. पद्धतिः (Methodology)

अयं आलेखः गुणात्मकविश्लेषणपद्धत्याः आधारेण सम्पन्नः। अस्मिन् अध्ययने राष्ट्रीयशिक्षानीतिः– २०२०, भारतीयशिक्षादर्शनम्, कृत्रिमबुद्धिमत्तानैतिकता (AI Ethics), शिक्षादर्शनसम्बद्धसाहित्यं तथा समकालीनशोधसामग्री सम्यगध्ययिता। अध्ययने व्याख्यात्मकः, तुलनात्मकः, समालोचनात्मकश्च दृष्टिकोणः स्वीकृतः। अस्य उद्देश्यं कृत्रिमबुद्धिमत्तायाः मानवीयप्रज्ञायाश्च सम्बन्धस्य दार्शनिकदृष्ट्या गम्भीरं विश्लेषणं कर्तुम् अस्ति।

## ५. प्रमुखपदानाम् दार्शनिकविश्लेषणम्

### ५.१ कृत्रिमबुद्धिमत्ता (Artificial Intelligence) : बुद्धेः अनुकरणम्, न तु चेतनायाः

कृत्रिमबुद्धिमत्ता (Artificial Intelligence) इति तादृशी संगणकीयव्यवस्था अस्ति, या मानवस्य बौद्धिकक्रियाणां—यथा अधिगमनम्, तर्कः, विश्लेषणम्, निर्णयग्रहणं च—अनुकरणं करोति। सा विशालमात्रायां उपलब्धदत्तांशस्य (Data) शीघ्रविश्लेषणं कर्तुं, प्रतिरूपाणि (Patterns) ज्ञातुं, सम्भावितनिष्कर्षान् च प्रस्तोतुं समर्था अस्ति।

किन्तु दार्शनिकदृष्ट्या कृत्रिमबुद्धिमत्तेः "बुद्धिः" मानवीय-चेतनायाःसमाना नास्ति। सा स्वानुभवं न प्राप्नोति, न अनुभवानामर्थं निर्माति, केवलं दत्तांशाधारेण प्रतिक्रियां ददाति। तस्याः आत्मानुभूतिः, नैतिकोत्तरदायित्वम्, अस्तित्वसम्बद्धप्रश्नेषु चिन्तन-शक्तिः च नास्ति।

अतः कृत्रिमबुद्धिमत्ता ज्ञानप्राप्तेः साधनम् अस्ति, किन्तु प्रज्ञायाः स्रोतः नास्ति।

### ५.२ मानवीयप्रज्ञा (Human Wisdom) : शिक्षायाः परमलक्ष्यम्

भारतीयशिक्षादर्शने प्रज्ञा केवलं बहुविषयज्ञानस्य नाम नास्ति। प्रज्ञा सा शक्ति अस्ति, या मनुष्यं सत्यासत्ययोः, उचितानुचितयोः, नित्यानित्ययोः च मध्ये विवेकपूर्णं निर्णयं कर्तुं समर्थयति। उपनिषत्सु एषा आत्मविद्या इति कथिता। बौद्धपरम्परायां प्रज्ञा, भगवद्गीतायां स्थितप्रज्ञता, स्वामीविवेकानन्दस्य चिन्तने तु मनुष्यस्य अन्तर्निहितपूर्णतायाः अभिव्यक्तिः इति प्रतिपादिता। अतः वक्तुम् शक्यते —

"ज्ञानं मनुष्यं समर्थं करोति, प्रज्ञा तु तम् उत्तरदायिनं करोति।"

अतः शिक्षायाः अन्तिमं लक्ष्यं केवलं ज्ञानार्जनं न, अपितु प्रज्ञाविकासः भवेत्।

**५.३ दार्शनिकविवेचना : प्रतिस्पर्धा न, अपितु समन्वयः**

अद्य प्रायः कृत्रिमबुद्धिमत्ता मानवीयप्रज्ञा च परस्परं प्रतिस्पर्धिनी शक्ती इव निरूप्येते। किन्तु शिक्षादर्शनस्य दृष्ट्या एषा धारणा पूर्णा नास्ति।

वास्तविकः प्रश्नः अयं न यत्—

"किं कृत्रिमबुद्धिमत्ता मनुष्यस्य स्थानं गृह्णीयात्?"

अपितु—

"कथं कृत्रिमबुद्धिमत्ता मनुष्यं अधिकं मानवीयं कर्तुं साहाय्यं कर्तुं शक्नोति?"

अत्रैव दार्शनिकविवेचन संवादस्वरूपे आरम्भः भवति।

दार्शिकानाम् मते भविष्यस्य शिक्षायां कृत्रिमबुद्धिमत्ता सूचनायाः विस्तारं करिष्यति, मानवीयप्रज्ञा तु तस्याः नैतिकदिशां निर्धारयिष्यति। एषः समन्वयः शिक्षां यान्त्रिकदृष्ट्या सक्षमां, मानवीयदृष्ट्या संवेदनशीलां च करिष्यति।

**६.शिक्षायां कृत्रिमबुद्धिमत्तायाः मानवीयप्रज्ञायाश्च दार्शनिक विवेचना**

कृत्रिमबुद्धिमत्तायाः मानवीयप्रज्ञायाश्च सम्बन्धः प्रायः प्रतिस्पर्धा-रूपेण निरूप्यते। यान्त्रिकदृष्ट्या एषा धारणा आकर्षका भवितुमर्हति, किन्तु शिक्षादर्शनस्य दृष्ट्या सा अपूर्णा अस्ति। शिक्षायाः उद्देश्यं यन्त्रस्य मनुष्यस्य वा श्रेष्ठतां सिद्धयितुं न, अपितु तादृशीं शिक्षणप्रक्रियां निर्मातुं यत्र यन्त्रज्ञानं मानवीयचेतनाविकासस्य सहायकं भवति। कृत्रिमबुद्धिमत्ता सूचनां सुव्यवस्थितां कर्तुं, तथ्यानां विश्लेषणं कर्तुं, जटिलसमस्यानां बहुविधानि समाधानानि प्रस्तोतुं च समर्था अस्ति। किन्तु मनुष्यः केवलं सूचनासङ्ग्राहकः नास्ति। सः अनुभवं करोति, मूल्यनिर्णयं करोति, नैतिकनिर्णयान् गृह्णाति, करुणां प्रदर्शयति, स्वकर्मणां उत्तरदायित्वमपि वहति। एतानि गुणानि एव तं यन्त्रात् पृथक् कुर्वन्ति।

भारतीयदर्शने ज्ञानस्य मूल्यं तस्य नैतिकप्रयोगे निहितम् अस्ति। भगवद्गीतायाम् श्रीकृष्णः अर्जुनाय केवलं युद्धकौशलं न शिक्षयति, अपितु धर्मस्य, कर्तव्यस्य, विवेकस्य च बोधं ददाति। उपनिषदः ज्ञानस्य परमलक्ष्यं आत्मसाक्षात्कारम् इति प्रतिपादयन्ति। भगवान् बुद्धः करुणाविहीनां प्रज्ञां अपूर्णाम् मन्यते। अतः भारतीयशिक्षादर्शनम् स्पष्टतया प्रतिपादयति यत् ज्ञानं तदैव सार्थकं भवति, यदा तत् विवेकेन नैतिक उत्तरदायित्वेन च सह सम्बद्धं भवति।

एतस्मिन् सन्दर्भे मतमिदम्—

"कृत्रिमबुद्धिमत्ता शिक्षां शीघ्रतरा कर्तुं शक्नोति, किन्तु मानवीयप्रज्ञैव शिक्षां सार्थकां कर्तुं समर्था अस्ति।"

अतः शिक्षायाः भविष्यं कृत्रिमबुद्धिमत्तेः मानवीयप्रज्ञायाश्च समन्वये निहितम् अस्ति, न तु परस्परप्रतिस्थापने।

**७. शिक्षायां कृत्रिमबुद्धिमत्तायाः अवसराः**

**७.१ वैयक्तिकाधिगमः (Personalized Learning)**

प्रत्येकस्य विद्यार्थिनः अधिगमगतिः, रुचिः, पूर्वज्ञानम्, बौद्धिकक्षमता च भिन्ना भवति। पारम्परिकशिक्षणपद्धत्यां सर्वेभ्यः विद्यार्थिभ्यः समानरीत्या शिक्षणं दीयते। अतः अनेकवारं वैयक्तिकावश्यकतानां समुचितं ध्यानं न भवति। कृत्रिमबुद्धिमत्त्याधारितव्यवस्थाः प्रत्येकस्य विद्यार्थिनः अधिगमव्यवहारस्य विश्लेषणं कृत्वा तस्यानुरूपं अध्ययनसामग्रीम्, अभ्यासकार्याणि, प्रतिपुष्टिं (Feedback) च दातुं समर्थाः भवन्ति। अनेन शिक्षा अधिका समावेशिनी प्रभाववती च भवितुम् अर्हति।

अतःवक्तुमं शक्यते वैयक्तिकाधिगमः केवलं दत्तांशविश्लेषणेन न सम्भवति। तस्मिन् अध्यापकस्य संवेदनशीलता, प्रेरणा, भावनात्मकसहयोगश्च अनिवार्यः अस्ति।

**७.२ शिक्षकस्य भूमिकायाः विस्तारः**

केचन मन्यन्ते यत् भविष्ये कृत्रिमबुद्धिमत्ता शिक्षकस्य स्थानं ग्रहीष्यति। शिक्षादर्शनस्य दृष्ट्या एषा धारणा समीचीना नास्ति। शिक्षकः केवलं ज्ञानप्रदाता न भवति। सः प्रेरणायाः, मूल्यशिक्षायाः, अनुशासनस्य, नैतिकजीवनस्य, जीवनदृष्टेः च मार्गदर्शकः भवति। कृत्रिमबुद्धिमत्ता सूचनां दातुं शक्नोति, किन्तु विद्यार्थिनः भयम्, असफलताम्, नैतिकसन्देहम्, भावनात्मकसङ्घर्षं वा मानवीय-सहानुभूत्या अवगन्तुं न शक्नोति। अतः भविष्ये अध्यापकस्य भूमिका न लुप्स्यते, अपितु परिवर्तिष्यते। सः केवलं "ज्ञानप्रदाता" न भविष्यति, अपितु "प्रज्ञामार्गदर्शकः" (Wisdom Mentor) भविष्यति।

**७.३ अनुसंधानस्य नवोन्मेषस्य च संवर्धनम्**

कृत्रिमबुद्धिमत्ता साहित्यसमीक्षायाम्, दत्तांशविश्लेषणे, भाषानुवादे, सन्दर्भव्यवस्थापने, प्रारूपनिर्माणे च महत्त्वपूर्णं साहाय्यं करोति। अनेन शोधकर्तारः स्वसमयं मौलिकचिन्तने, सिद्धान्तनिर्माणे, समालोचनात्मकविश्लेषणे च अधिकतया नियोजयितुं शक्नुवन्ति। किन्तु यदि अनुसन्धानं केवलं कृत्रिमबुद्धिमत्तिनिर्मितसामग्रीम् आश्रित्य क्रियते, तर्हि मौलिकता, बौद्धिकसत्यनिष्ठा, स्वतन्त्रचिन्तनशक्तिश्च बाधिताः भवितुम् अर्हन्ति। अतः कृत्रिमबुद्धिमत्ता अनुसन्धानस्य सहायिका भवेत्, न तु शोधकर्तुः विकल्पः।

**७.४ समावेशीशिक्षायाः सम्भावनाः**

कृत्रिमबुद्धिमत्ता दृष्टिबाधितानाम्, श्रवणबाधितानाम्, विशेषावश्य-कतायुक्तविद्यार्थिनां च कृते विविधसहायकप्रौद्योगिकीः (Assistive Technologies) विकसितुं समर्था अस्ति।अनेन शिक्षा अधिका समावेशिनी, सुलभा, समानावसरप्रदा च भवति।भारतीयशिक्षा-दर्शनमपि प्रतिपादयति यत् प्रत्येकः विद्यार्थी स्वस्वक्षमतानुसारं शिक्षां प्राप्नुयात्। अतः समावेशीशिक्षाक्षेत्रे कृत्रिमबुद्धिमत्तायाः उपयोगः विशेषमहत्त्वपूर्णः अस्ति।

## ८. कृत्रिमबुद्धिमत्त्याधारितशिक्षायाः नैतिकप्रश्नाः

कस्यापि यान्त्रिकनवोन्मेषस्य मूल्यं केवलं तस्य उपयोगितया न निर्धारितं भवति। तस्य नैतिकप्रभावः अपि समानरूपेण महत्त्वपूर्णः अस्ति। शिक्षाक्षेत्रे कृत्रिमबुद्धिमत्तायाः उपयोगेन अनेकाः नैतिक-समस्याः उत्पद्यन्ते।

### ८.१ किं यन्त्रं नैतिकनिर्णयं कर्तुं शक्नोति?

कृत्रिमबुद्धिमत्ता उपलब्धदत्तांशस्य आधारेण निर्णयं करोति। किन्तु नैतिकनिर्णयः केवलं तथ्याधारितः न भवति। तस्मिन् करुणा, परिस्थितिः, न्यायः, सांस्कृतिकपरिप्रेक्ष्यः, मानवीयसंवेदनाश्च अपि आवश्यकाः भवन्ति। यदि विद्यार्थिनः दोषः केवलं नियमाधारेण परीक्ष्यते, तर्हि एकः निर्णयः भवेत्। किन्तु यदि तस्य सामाजिकम्, आर्थिकम्, पारिवारिकम्, मनोवैज्ञानिकं च परिप्रेक्ष्यं विचार्यते, तर्हि निर्णयः भिन्नः भवेत्। अतः कृत्रिमबुद्धिमत्ता मानवीयनैतिकविवेकस्य पूर्णः विकल्पः न भवितुम् अर्हति।

### ८.२ दत्तांशगोपनीयता तथा स्वायत्तता

कृत्रिमबुद्धिमत्त्याधारितशिक्षणव्यवस्थाः विद्यार्थिनां अधिगमव्यव-हारम्, उपलब्धयः, व्यक्तिगतसूचनाः च सङ्गृह्णन्ति।

अतः केचन महत्त्वपूर्णाः प्रश्नाः उद्भवन्ति—

- अस्य दत्तांशस्य स्वामी कः?
- अस्य उपयोगः कस्मै प्रयोजनाय भविष्यति?
- किं विद्यार्थिनां निजता सुरक्षिताऽस्ति?

शिक्षायाः आधारः विश्वासः अस्ति। अतः दत्तांशस्य उपयोगः सदैव नैतिकः, उत्तरदायी, पारदर्शी च भवितुमर्हति।

### ८.३ कलनविधिपक्षपातः (Algorithmic Bias)

कृत्रिमबुद्धिमत्ता तैरेव दत्तांशैः शिक्षते, ये तस्यै प्रदीयन्ते। यदि प्रशिक्षणदत्तांशेषु सामाजिकः, सांस्कृतिकः, लैङ्गिकः वा पक्षपातः अस्ति, तर्हि कृत्रिमबुद्धिमत्तेः निर्णयाः अपि पक्षपातपूर्णाः भविष्यन्ति। एवं स्थितिः शिक्षायाः समानावसरस्य सिद्धान्तस्य विरुद्धा भवति। अतः कृत्रिमबुद्धिमत्त्याधारितव्यवस्थानां निरन्तरं नैतिकमूल्याङ्कनम् अत्यावश्यकम्।

### ८.४ शैक्षणिकीमानदारी (Academic Integrity)

अद्य कृत्रिमबुद्धिमत्ता निबन्धान्, शोधसारांशान्, प्रस्तुतीकरणानि, कार्यक्रमसङ्केतान् (Programming Code) इत्यादीनि निर्मातुं समर्था अस्ति।

अतः प्रश्नः भवति—विद्यार्थी स्वयमेव कियत् चिन्तयति, कियत् तु कृत्रिमबुद्धिमत्तेः उपरि निर्भरः भवति?

मतमिदम् —

"यदि कृत्रिमबुद्धिमत्ता विद्यार्थिनः चिन्तनशक्तेः स्थानं गृह्णाति, तर्हि शिक्षायाः मूलप्रयोजनमेव संकटे पतति।"

अतः शिक्षायाः उद्देश्यं कृत्रिमबुद्धिमत्तायाः उत्तरदायित्वपूर्णः उपयोगः भवेत्, न तु तस्याः पूर्णनिर्भरता।

## ९. वर्तमानकाले विषयस्य प्रासङ्गिकता

### ९.१ सूचनाविस्फोटस्य युगे प्रज्ञायाः आवश्यकता

अद्य सूचनायाः अभावः नास्ति, अपितु सूचनायाः अतिशयप्रचुरता वर्तते। अधुना मुख्यः प्रश्नः अयं न यत् ज्ञानं कुत्र लभ्यते, अपितु सत्यासत्ययोः, हिताहितयोः, उपयोग्यनुपयोग्ययोश्च मध्ये विवेकपूर्णः निर्णयः कथं क्रियेत इति। अत्रैव मानवीयप्रज्ञायाः महत्त्वम् अधिकं दृश्यते। प्रज्ञा मनुष्यं केवलं ज्ञानी न करोति, अपितु विवेकिनं, उत्तरदायिनं, नैतिकं च करोति।

### ९.२ कृत्रिमबुद्धिमत्ता तथा भविष्ये व्यवसायावसराः

कृत्रिमबुद्धिमत्तायाः विकासेन अनेके पारम्परिकव्यवसायाः परिवर्तन्ते। भविष्ये केवलं तथ्यस्मरणशक्तेः मूल्यं न्यूनं भविष्यति। तस्य स्थाने सृजनशीलचिन्तनम्, नैतिकनेतृत्वम्, सहकार्यभावना, जटिलसमस्यासमाधानशक्तिः च अधिकं महत्त्वं प्राप्स्यन्ति। अतः शिक्षायाः उद्देश्यं केवलं सूचनाप्रदानं न, अपितु विद्यार्थिनां एतासां क्षमतानां विकासः भवेत्।

### ९.३ मानसिकस्वास्थ्यं तथा डिजिटलनिर्भरता

अत्यधिकः डिजिटलोपकरणानाम् उपयोगः सामाजिकविरक्तिं, एकाग्रताहानिं, मानसिकतनावं च वर्धयति। भारतीयशिक्षादर्शनम् आत्मसंयमस्य, ध्यानस्य, योगस्य, आत्मचिन्तनस्य, सन्तुलित-जीवनस्य च महत्त्वं प्रतिपादयति। एते सिद्धान्ताः कृत्रिमबुद्धिमत्तायाः युगे अधिकं प्रासङ्गिकाः भवन्ति। अतः आधुनिकशिक्षायां यन्त्रज्ञानस्य उपयोगेन सह मानसिकसन्तुलनस्य अपि विकासः करणीयः।

### ९.४ वैश्विकनागरिकता तथा मानवीयोत्तरदायित्वम्

कृत्रिमबुद्धिमत्ता देशसीमाभिः न बद्धा अस्ति। अतः भविष्यस्य शिक्षायाः दायित्वं भवति यत् सा तादृशान् नागरिकान् निर्मातुं प्रयतेत ये यान्त्रिकदृष्ट्या दक्षाः, नैतिकदृष्ट्या उत्तरदायिनः, सामाजिकदृष्ट्या संवेदनशीलाश्च स्युः। भारतीयपरम्परायाः "वसुधैव कुटुम्बकम्" इति आदर्शः अस्मिन् विषये वैश्विकनैतिकतायाः दृढमाधारं प्रददाति।

## १०. समालोचनात्मकं विश्लेषणम्

वर्तमानकाले शिक्षासम्बद्धेषु विमर्शेषु द्वे विपरीते धारणे प्रचलिते स्तः। प्रथमा धारणा मन्यते यत् कृत्रिमबुद्धिमत्ता शिक्षायाः प्रायः सर्वासां समस्याः समाधास्यति। द्वितीया धारणा तु मन्यते यत् कृत्रिमबुद्धिमत्ता शिक्षायाः संकटम् अस्ति, अतः तस्याः उपयोगः सीमितः भवेत्। लेखिका एतयोः उभयोः मतयोः पूर्णतया सहमतः नास्ति।

वास्तविकः प्रश्नः अयं न—

"किं कृत्रिमबुद्धिमत्ता लाभकारी वा न वा?

अपितु—

"कृत्रिमबुद्धिमत्ता कथं प्रकारस्याः शिक्षायाः निर्माणं करोति?"

यदि शिक्षायाः उद्देश्यं केवलं सूचनाप्रदानं भवेत्, तर्हि कृत्रिमबुद्धिमत्ता पर्याप्ता अस्ति।

किन्तु यदि शिक्षायाः लक्ष्यं भवेत्—

- विवेकस्य विकासः,
- नैतिकनिर्णयक्षमता,
- करुणा,
- आत्मचिन्तनम्,
- लोकतान्त्रिकचेतना,
- सांस्कृतिकउत्तरदायित्वम्,

तर्हि कृत्रिमबुद्धिमत्ता केवलं सहायिका भवितुम् अर्हति, विकल्पः न।

अस्य आधारस्य उपरि लेखिका नवीनं दार्शनिकप्रतिमानं प्रतिपादनं करोति—

"भविष्यस्य शिक्षायाः वास्तविकः प्रतिमानः केवलं कृत्रिमबुद्धिमत्त्याधारितः न भवेत्, अपितु 'प्रवर्धितमानवीयप्रज्ञा' (Augmented Human Wisdom) इत्यस्य आधारेण निर्मितः भवेत्। अर्थात् एतादृशी शिक्षा भवेत् या कृत्रिमबुद्धिमत्तेः विश्लेषणात्मकक्षमतां मानवीयप्रज्ञया, नैतिकविवेकेन, आत्मबोधेन च समन्वययति।"

एषः विचारः अस्य शोधालेखस्य मौलिकं दार्शनिकयोगदानम् अस्ति। अनेन प्रतिपाद्यते यत् भविष्यस्य शिक्षा न केवलं यान्त्रिकप्रगतेः, अपितु मानवीयमूल्यानां, नैतिकविवेकस्य, प्रज्ञायाश्च समुचितसमन्वयेन एव सार्थका भविष्यति।

## ११. भविष्यस्य शिक्षायाः प्रमुखाः चुनौत्यः

कृत्रिमबुद्धिमत्तायाः तीव्रविकासः शिक्षाक्षेत्राय अनेकान् नवीनान् अवसरान् प्रददाति। तथापि तेन सह दार्शनिकाः, नैतिकाः, शैक्षिकाश्च बहवः प्रश्नाः अपि उत्पद्यन्ते। यदि एतेषां समुचितं समाधानं न क्रियते, तर्हि शिक्षायाः मूलप्रयोजनममनुष्यस्य समग्रविकासः—प्रभावितः भविष्यति।

### ११.१ सूचनाप्रचुरता, प्रज्ञायाः अभावः

अद्य विद्यार्थी अल्पकाले एव विश्वस्य कस्यापि विषयस्य विषये सूचनां प्राप्तुं शक्नोति। किन्तु सूचनाया आधिक्यमेव प्रज्ञायाः विकासं न करोति। भारतीयदर्शने ज्ञानम् तथा प्रज्ञा पृथगर्थौ स्तः। ज्ञानं बाह्यविषयान् बोधयति, प्रज्ञा तु आत्मबोधं, विवेकं, सम्यग्निर्णयशक्तिं च विकसितयति। यदि शिक्षा केवलं सूचनासङ्ग्रहे सीमिता भवेत्, तर्हि विद्यार्थी दक्षः भविष्यति, किन्तु जीवनस्य नैतिकसमस्यासु समुचितनिर्णयं कर्तुं न समर्थः भविष्यति।

### ११.२ शिक्षकस्य परिवर्तिता भूमिका

केचन मन्यन्ते यत् कृत्रिमबुद्धिमत्तायाः कारणात् भविष्ये शिक्षकस्य आवश्यकता न भविष्यति। एषा धारणा शिक्षायाः व्यापकस्वरूपं न सम्यग् अवगच्छति।

शिक्षकः केवलं ज्ञानस्य प्रदाता नास्ति। सः प्रेरकः, मार्गदर्शकः, मूल्यसंवाहकः, व्यक्तित्वनिर्माता च अस्ति। सः विद्यार्थिनः अन्तर्निहितप्रतिभां ज्ञात्वा तस्य आत्मविश्वासं वर्धयति, जीवनस्य नैतिकनिर्णयेषु च मार्गदर्शनं करोति।

अतः भविष्ये शिक्षकस्य स्थानं न न्यूनं भविष्यति, अपितु सः "प्रज्ञामार्गदर्शकः" इति नूतनां भूमिकां धारयिष्यति।

### ११.३ समालोचनात्मकचिन्तनस्य ह्रासः

यदि विद्यार्थी प्रत्येकस्य प्रश्नस्य उत्तरं कृत्रिमबुद्धिमत्तेः एव स्वीकरोति, तर्हि तस्य स्वतन्त्रचिन्तनशक्तिः, तर्कक्षमता, नवीनदृष्टिकोणस्य विकासश्च शनैः शनैः क्षीयेत। समालोचनात्मकचिन्तनम् शिक्षायाः मूलाधारः अस्ति। सुकरातस्य प्रश्नोत्तरपद्धतिः, उपनिषदां संवादपरम्परा च दर्शयतः यत् शिक्षा प्रश्नैः विकसिताऽस्ति, न केवलम् उत्तरैः। कृत्रिमबुद्धिमत्ता उत्तरं दातुं शक्नोति, किन्तु जिज्ञासा तथा गम्भीरचिन्तनशक्तिः केवलं मनुष्ये एव विकसितुं शक्यते।

### ११.४ नैतिकनिर्णयस्य चुनौती

कृत्रिमबुद्धिमत्त्याः निर्णयाः दत्तांशेषु तथा कलनविधिषु (Algorithms) आधारिताः भवन्ति। किन्तु मानवीयनिर्णयः अनुभवेन, संवेदनया, संस्कृत्या, विवेकेन, नैतिकचेतनया च निर्मीयते। उदाहरणार्थं, यदि विद्यार्थी परीक्षायां न्यूनाङ्कान् प्राप्नोति, तर्हि तस्य कारणानि पारिवारिकानि, आर्थिकानि, सामाजिकानि, मानसिकानि वा भवितुम् अर्हन्ति। कृत्रिमबुद्धिमत्ता एतानि कारणानि विश्लेषयितुं शक्नोति, किन्तु तेषां प्रति मानवीयकरुणां न अनुभवितुं शक्नोति। अतः शिक्षाक्षेत्रे अन्तिमः नैतिकनिर्णयः मनुष्येण एव करणीयः।

### ११.५ मानवीयसंबन्धानां क्षयः

शिक्षा मूलतः सामाजिकप्रक्रिया अस्ति। अध्यापकविद्यार्थिनोः मध्ये विश्वासः, संवादः, प्रेरणा, सहानुभूतिः च शिक्षायाः आधाराः सन्ति। यदि सम्पूर्णा शिक्षाप्रक्रिया केवलम् अङ्कीयमाध्यमेषु यन्त्रेषु च आधारिताऽभवेत्, तर्हि शिक्षायाः मानवीयपक्षः दुर्बलः भविष्यति। मतम् अस्ति यत्—

"ज्ञानस्य आदानप्रदानं डिजिटलमाध्यमेन भवितुं शक्नोति, किन्तु व्यक्तित्वनिर्माणं केवलं मानवीयसंबन्धैरेव सम्भवति।"

## १२. सुझावाः (Recommendations)

### १२.१ कृत्रिमबुद्धिमत्तासाक्षरता शिक्षायाः अनिवार्याङ्गं भवेत्

विद्यार्थिभ्यः केवलं कृत्रिमबुद्धिमत्तेः उपयोगः न शिक्षणीयः, अपितु तस्याः सीमाः, नैतिकप्रश्नाः, कलनविधिपक्षपातः, सामाजिकप्रभावाश्च अपि बोधनीयाः।

### १२.२ शिक्षकप्रशिक्षणे कृत्रिमबुद्धिमत्तायाः शिक्षादर्शनस्य च समन्वयः

शिक्षकप्रशिक्षणे केवलं डिजिटलोपकरणानां प्रशिक्षणं पर्याप्तं नास्ति। कृत्रिमबुद्धिमत्तायाः दार्शनिकाः, नैतिकाः, सामाजिकाश्च आयामाः अपि अध्यापनीयाः। शिक्षकः ज्ञातुमर्हति यत् कुत्र कृत्रिमबुद्धिमत्तायाः उपयोगः हितकरः, कुत्र मानवीयहस्तक्षेपः अनिवार्यः।

### १२.३ मूल्यानुगुणा डिजिटलशिक्षा

भविष्यस्य शिक्षायां डिजिटलदक्षता तथा नैतिकमूल्यानि उभे समानरूपेण महत्त्वपूर्णे भवेताम्।

पाठ्यक्रमे विशेषतया एते मूल्याः समावेश्याः—

- सत्यनिष्ठा
- उत्तरदायित्वम्
- करुणा
- डिजिटल नागरिकता
- बौद्धिकसत्यनिष्ठा
- पर्यावरणसंवेदनशीलता
- वैश्विकसहअस्तित्वम्

**१२.४ भारतीयज्ञानपरम्परायाः समावेशः**

उपनिषदः, भगवद्गीता, भगवान् बुद्धः, भगवान् महावीरः, स्वामीविवेकानन्दः, महात्मा गान्धी, रवीन्द्रनाथठाकुरः, श्रीअरविन्दः च प्रतिपादितान् आत्मानुशासनम्, विवेकः, प्रज्ञा, आत्मचिन्तनम्, नैतिकनेतृत्वम् इत्यादीन् सिद्धान्तान् आधुनिकशिक्षायां समावेशयितुं आवश्यकम्। एवं यान्त्रिकदक्षता मानवीयसंवेदनशीलता च सम्यक् समन्वेष्येते।

**१२.५ मानवकेन्द्रिता कृत्रिमबुद्धिमत्ता**

शिक्षायां कृत्रिमबुद्धिमत्तेः विकासः एतस्मिन् सिद्धान्ते आधारितः भवेत् यत् तन्त्रज्ञानं मनुष्यस्य क्षमतानां विकासं करोतु, न तु तस्य प्रतिस्थापनम्। कृत्रिमबुद्धिमत्तायाः उद्देश्यं अध्यापकस्य स्थानग्रहणं न, अपितु अध्यापनकार्यं अधिकं प्रभावकरं कर्तुम् अस्ति।

**१३. दार्शनिकदृष्टिकोणः**

अस्य आलेखस्य मुख्यप्रतिपादनम् अस्ति यत् अद्यतनशिक्षाविमर्शे कृत्रिमबुद्धिमत्ता प्रायः "बुद्धेः" आधारेण परिभाष्यते, किन्तु शिक्षायाः परमलक्ष्यं "प्रज्ञायाः" विकासः अस्ति।

दार्शिकनाम् मते ज्ञानम् (Knowledge), बुद्धिः (Intelligence), प्रज्ञा (Wisdom) इति त्रयः पृथगवस्थाः सन्ति।

- ज्ञानम् वस्तुनः सत्यं बोधयति।
- बुद्धिः तस्य ज्ञानस्य उपयोगं कथं करणीयम् इति शिक्षयति।
- प्रज्ञा तस्य ज्ञानस्य उपयोगः कदा, किमर्थं, कस्य हिताय च करणीयः इति निर्णेतुं सामर्थ्यं ददाति।

अत्रैव मनुष्यस्य कृत्रिमबुद्धेश्च मूलभूतः भेदः दृश्यते।

कृत्रिमबुद्धिमत्ता सूचनां विश्लेषयितुं शक्नोति, किन्तु नैतिकपरिणामानां अनुभवं न कर्तुं शक्नोति। सा करुणायाः अनुकरणं कर्तुं शक्नोति, अनुभवं तु न। सा भाषां निर्मातुं शक्नोति, मौनस्य अनुभूतिं न। सा तर्कं प्रस्तोतुं शक्नोति, आत्मबोधं तु न प्राप्नोति।

अतः अध्ययनात् एकां "प्रज्ञाकेन्द्रितशिक्षाप्रतिमानम्" इति नवीनां संकल्पनां प्रतिपादयति।

अस्य प्रतिमानस्य पञ्च आधाराः सन्ति—

- सूचनातः अधिकः विवेकः।
- यन्त्रज्ञानात् अधिका नैतिकता।
- दक्षतातः अधिकम् उत्तरदायित्वम्।
- प्रतिस्पर्धायाः अपेक्षया सहअस्तित्वम्।
- कृत्रिमबुद्धिमत्तेः अपेक्षया मानवीयप्रज्ञायाः महत्त्वम्।

अतः वक्तुम् शक्यते यत् एकविंशतितमशताब्द्याः श्रेष्ठा शिक्षा सा न भविष्यति या केवलम् अङ्कीयतन्त्रे आधारिताऽस्ति, अपितु सा भविष्यति या यन्त्रज्ञानस्य समुचितोपयोगेन मनुष्यं अधिकं संवेदनशीलं, विवेकिनं, उत्तरदायिनं च निर्माति।

**१४. उपसंहारः**

कृत्रिमबुद्धिमत्तया शिक्षायाः स्वरूपे गम्भीरः परिवर्तनः जातः। शिक्षणम्, अधिगमः, अनुसन्धानम्, मूल्याङ्कनम्, ज्ञानस्य सुलभता च अनेन अधिकं प्रभावकरा, शीघ्रा, वैयक्तिका च जाता। तथापि शिक्षायाः प्रयोजनं केवलं ज्ञानप्रदानं नास्ति, अपितु मनुष्यनिर्माणम् अस्ति। चरित्रम्, नैतिकविवेकः, सहानुभूतिः, आत्मबोधः, सृजनशीलता, सामाजिकोत्तरदायित्वं च मानवीयचेतनायाः विशिष्टगुणाः सन्ति। एते गुणाः कृत्रिमबुद्धिमत्त्या पूर्णतया प्रतिस्थापयितुं न शक्यन्ते। अतः भविष्यस्य शिक्षायाः मूलप्रश्नः अयं न—"किं कृत्रिमबुद्धिमत्ता शिक्षकस्य स्थानं ग्रहीष्यति?" अपितु—"कथं

कृत्रिमबुद्धिमत्ता शिक्षकं विद्यार्थिनं च अधिकं विवेकिनं, सृजनशीलं, मानवीयं च कर्तुं साहाय्यं करिष्यति?" यदि शिक्षा कृत्रिमबुद्धिमत्तेः विश्लेषणात्मकक्षमतां मानवीयप्रज्ञायाः नैतिकचेतनया सह समन्वययितुं शक्नोति, तर्हि सा एव एकविंशतितमशताब्द्याः वास्तविकमानवीयशिक्षा भविष्यति।अतः निष्कर्षतः वक्तुं शक्यते यत् भविष्यस्य शैक्षिकप्रतिमानम् केवलं "कृत्रिमबुद्धिमत्त्याधारितशिक्षा" न, अपितु "प्रज्ञामार्गदर्शिता कृत्रिमबुद्धिमत्त्याधारितशिक्षा" भवेत्, यत्र यन्त्रज्ञानं साधनं भवति, मानवीयप्रज्ञा तु तस्य नैतिकमार्गदर्शिका भवति।

**सन्दर्भसूची**

अरविन्दः, श्री। (2015). शिक्षायाः आधारभूतसिद्धान्ताः,पुदुच्चेरी: श्रीअरविन्दाश्रमः

त्रिपाठी, अभिषेक,(2020). AI आर्टिफिशियल इंटेलिजेंस उपयोगिता और चुनौतियाँ, प्रभात प्रकाशन

भारतसरकारः। (2020). राष्ट्रीयशिक्षानीतिः–2020। नवीदिल्ली: शिक्षामन्त्रालयः।

राधाकृष्णन्, सर्वपल्ली। (2017). भारतीयदर्शनम्। नवीदिल्ली: राजपाल एण्ड सन्स

विवेकानन्दः,स्वामी। (2018). स्वामिविवेकानन्दस्य शिक्षाचिन्तनम्। कोलकाता: अद्वैताश्र

UNESCO. (2021). Recommendation on the Ethics of Artificial Intelligence. Paris: UNESCO.

UNESCO. (2023). Guidance for Generative AI in Education and Research. Paris: UNESCO.

**अन्तर्जालस्रोताः**

शिक्षा में कृत्रिम बुद्धिमत्ता (AI) के युग में शिक्षकों की बदलती भूमिका : एक विश्लेषणात्मक अध्ययन

https://share.google/SlLkWJDY0EVBKmBdW

https://www.unesco.org

https://ncert.nic.in

www.education.gov.in